व्याधमुद्गिरन्” माघः। आ+मुद्–घञ्। २प्रहर्षे ल्युट्। आमोदनमप्यत्र न०।

**आमोदन** त्रि० आ+मुद–णिच् ल्यु। प्रहर्षजनके सुगन्धिसम्पादने “अभुञ्जतामोदनमोदनं जनाः” नैष०। भावे ल्युट्। १प्रहर्षसम्पादने २सुगन्धसम्पादने च।

**आमोदित** त्रि० आ+मुद–णिच्–क्त। १प्रहर्षिते २कृतामोदे ३सुरभीकृते च।

**आमोदिन्** त्रि० आमोदयति सुरभीकरोति आमोद+तत्यर्थे णिच्–णिनि। मुखवासने १कर्पूरादौ। आमोद+अस्त्यर्थे इनि। २आमोदयुक्ते स्त्रियां ङीप्। “नवकुटजवनस्यामोदिनो गन्धवाहाः”।

**आमोष** त्रि०आमुष्णाति–आ+मुष–पचाद्यच्। सम्यगपहारके चौरादौ। आ+मुष–भावे घञ्। २अपहरणे। “यथा विभ्यदामोषमोषात्” शत०ब्रा०।

**आम्नात** त्रि०आ+म्ना–क्त। १सम्यगभ्यस्ते २सम्यगधीते वेदादौ। ३कथिते च “समौ हि शिष्टैराम्नातौ” माघः भावे क्त। ४सम्यगभ्यासे न०

**आम्नातिन्** त्रि०आम्नातमनेन इष्टा०इनि। १कृतवेदाद्यभ्यासे २कृतवेदाध्ययने च स्त्रियां ङीप्। “आम्नातिभिर्नीतिषु बुद्धिमद्भिः” भट्टिः।

**आम्नान** न० आ+भावे ल्युट्। १वेदादिपाठे २तदभ्यासे च “विष्णु र्वामावास्यायां छौताम्नानात्”कात्या०२,२,२५।

**आम्नाय** पु० आ+म्ना–घञ्। १सम्यगभ्यासे २सम्यक्पाठे च अभ्यासस्य सम्यक्त्वं च नियमधारणपूर्व्वकत्वं गुरुमुखश्रवणपूर्व्वकत्वञ्च। कर्म्मणि घञ्। ३वेदे “आम्नायस्य क्रियार्थत्वादानार्थक्यमतदर्थानाम्” जैमि० “आम्नाये स्मृतितन्त्रे च” रघु०ष्टतपु०। “आम्नायवचनं सत्यमित्ययं लोकसंग्रहः–आम्नायेभ्यः पुनर्वेदाः प्रसृताः सर्वतोमुखाः भा०शा०२६१अ०। [वुञ्। अम्बरीषपुत्रविषयादौ।

**आम्बरीषपुत्रक** पु० अम्बरीषपुत्र+चतुरर्थ्यां राजन्या०

**आम्बष्ठ** पुंस्त्री०अम्बष्ठस्यापत्यम् शिवा० अण्। अम्बष्ठापत्ये जात्ये। आम्बष्ठ्यः। स्त्रियाम् चाप्।

**आम्बिकेय** पु० अम्बिकाया अपत्यं शुभ्रा० ढक्। विचित्रवीर्य्यस्य क्षेत्रे काशिराजस्य मध्यमकन्यायाम् अम्बिकायां व्यासेनोत्पादिते १धृतराष्ट्रे स हि अकाले दिवं गतस्य विचित्रवीर्य्यस्य अम्बिकाम्बालिकयोःपत्न्योर्मध्ये अम्बिकायां ज्येष्ठभार्य्यायां सत्यवत्यानियुक्तेन व्यासेनोत्पादितः तत्कथा यथा “ततोऽम्बिकायां प्रथमं नियुक्तः सत्यवाग्टषिः। दीप्यमानेषु दीपेषु शरणं प्रविवेश ह। तस्य कृष्णस्य कपिला जटा दीप्ते च लोचने। बभ्रूणि चैव श्मश्रूणि दृष्ट्वा देवी न्यमीलयत्। संबभूव तया सार्द्धं मातुः प्रियचिकीर्षया। भयात् काशीसुता तन्तु नाशक्नोदभिवीक्षितुम्। ततो निष्क्रान्तमागत्य माता पुत्रमुवाच ह। अप्यस्यां गुणवान् पुत्रो राजपुत्रो भविष्यति?। निशम्य तद्वचो मातुर्व्यासः सत्यवतीसुतः। प्रोवाचातीन्द्रियज्ञानो विधिना संप्रचोदितः। नागायुतसमप्राणो विद्वान् राजर्षिसत्तमः। महाभागो महौदार्य्यो महाबुद्धिर्भविष्यति। तस्य चापि शतं पुत्रा भविष्यन्ति महात्मनः। किन्तु मातुः स वैगुण्यादन्ध एव भविष्यति” इत्युपक्रम्य पाण्डुविदुरोत्पत्तिमुपवर्ण्य च “एते विचित्रवीर्य्यस्य क्षेत्रे द्वैपायनादृषेः। जज्ञिरे देवगर्भाभाः कुरुवंशविवर्द्धनाः” इत्युक्तम् भा०आ०प०१०६ अ०। अम्बिकायाश्च यथा विचित्रवीर्य्यभार्य्यात्वं तथोक्तं अम्बाशब्दे ३२८पृष्ठे“आम्बिकेयेन दृश्ये राज्ञा दुर्य्योधनेन च” भा०व०प०१२अ० “परं श्रेयः पाण्डवेया! यथाह भीष्मस्तव सुतवानाम्बिकेयः” भा०व०प० ५अ०। अम्बिकायाः पार्व्वत्या अपत्यम् ढक्। २कार्त्तिकेये। तस्य तदुत्पत्तिकथा अग्निकुमारशब्दे ६५पृष्ठे दृश्या।

**आम्भसिक** पु०अम्भसा वर्त्तते ठक्। मत्स्ये सि०कौ०।

**आम्भि** त्रि० अम्भसो जातादि बाह्वा० इञ् सलोपश्च। अम्भोजातादौ।

**आम्र** पु० अम–गत्यादिषु रन् दीर्घश्च। १स्वनामख्याते वृक्षे तस्य फलम् अण् तस्य लुक्। २तत्फले च न०। आम्रस्य फलपुष्पादिगुणा उक्ता भा०प्र०। यथा “आम्रपुष्पमतीसारकफपित्तप्रमेहनुत्। असृग्दुष्टिहरं शीतं रुचिकृत् ग्राहि वातलम्। आम्रं बालं कषायाम्लं रुच्यं मारुतपित्तकृत्। तरुणं तु तदत्यम्लं रुक्षं दोषत्रयास्रकृत्। आम्रमामं त्वचा हीनमातपेऽतीव शोषितम् अम्लं स्वादु कषायं स्याद्भेदनं कफवातजित्। पक्वन्तु मधुरं वृष्यं स्निग्धं शुक्रबलप्रदम्। गुरु वातहरं हृद्यं वर्ण्यं शीतमपित्तलम्। कषायानुरसं वह्निश्लेष्मशुक्रविवर्द्धनम्। तदेव वृक्षसम्पक्वं गुरु वातहरं परम्। मधुराम्लं सरं किञ्चित् भवेत् पित्तप्रकोपणम्। आम्रं कृत्रिमपक्वं यत्तद्भवेत् पित्तनाशनम्। रसस्याम्लस्य हानेस्तु माधुर्य्याच्च विशेषतः। चूषितं तत् परं रुच्यं बलवीर्य्यकरं लघु। शीतलं शीघ्रपाकि स्याद्वातपित्तहरं सरम्। तद्रसोगालितो बल्यो गुरुर्वात